# Shri Ganapati Stotram 5

# શ્રીગણપતિસ્તોત્રમ્ ૫

## Document Information

Text title : Shri Ganapati Stotram 5

File name : gaNapatistotram5.itx

Category : ganesha, vAsudevAnanda-sarasvatI

Location : doc_ganesha

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીગણપતિસ્તોત્રમ્ ૫

દ્વિરદાનન વિઘ્નકાનનજ્વલન ત્વં પ્રથમેશનન્દન ।
મદનપતિમાખુવાહન જ્વલનાભાસિતપિઙ્ગલોચન ॥ ૧॥

અહિબન્ધન રક્તચન્દન પ્રિયદૂર્વાઙ્કુરભારપૂજન ।
શશિભૂષણ ભક્તપાલન જ્વલનાક્ષાઽવ નિજાન્નિજાવન ॥ ૨॥

વિવિધામરમર્ત્યનાયકઃ પ્રથિતસ્ત્વં ભુવને વિનાયકઃ ।
તવ કોઽપિ હિ નૈવ નાયકસ્તત એવ ત્વમજો વિનાયક ॥ ૩॥

બલિનિગ્રહ ઈશ કેશવસ્ત્રિપુરાખ્યાસુરનિગ્રહે શિવઃ ।
જગદુદ્ભવનેઽબ્જસમ્ભવઃ સકલાઞ્જેતુમહો મનોભવઃ ॥ ૪॥

મહિષાસુરનિગ્રહે શિવા ભવમુક્ત્યૈ મુનયો ધૃતાશિવાઃ ।
યમપૂજયદિષ્ટસિદ્ધયે વરદો મે ભવ ચેષ્ટસિદ્ધયે ॥ ૫॥

ગજકર્ણક મૂષકસ્થિતે વરદે ત્વય્યભયે હૃદિ સ્થિતે ।
જયલાભરમેષ્ટસમ્પદાઃ ખલુ સર્વત્ર કુતો વદાપદાઃ ॥ ૬॥

સઙ્કલ્પિતં કાર્યમવિઘ્નમીશ દ્રાક્સિદ્ધિમાયાતુ મમાખિલેશ ।
પાપત્રયં મે હર સન્મતીશ તાપત્રયં મે હર શાન્ત્યધીશ ॥ ૭॥

ગણાધીશો ધીશો હરિહરવિધીશોઽભયકરો
ગુણાધીશો ધીશો વિજયત ઉમાહૃત્સુખકરઃ ।
બુધાધીશો નીશો નિજભજકવિઘ્નૌઘહરકો
મુદાધીશો પીશો યશસ ઉભયર્ધેશ્ચ શરણમ્ ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં ગણપતિસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Ganapati Stotram 5*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*